National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2025; 1(60): 187-189
© 2025 NJHSR
www.sanskritarticle.com

**मानु-दासः**
गवेषिका,
राष्ट्रीयसंस्कृतविश्वविद्यालयः,
तिरुपतिः, अन्ध्रप्रदेशः, भारतवर्षम्

# संस्कृतसाहित्ये आधुनिकतायाः स्वरूपम्

**मानु-दासः**

**प्रबन्धसंक्षेपः-** 'अतीतादिव्यवहारहेतुः कालः' इति तर्कसंग्रहवचनानुसारं संस्कृतव्याकरणे दर्शने च त्रयः कालाः सन्ति- भूतं, वर्तमानं, भविष्यं च। अस्य वर्तमानकालस्य कृते नूतनः शब्दः प्रविष्टः अस्ति। नवशब्दः आधुनिककालः अस्ति। आधुनिकशब्दस्य अनेकाः समार्थकशब्दाः सन्ति। सरलतया वर्तमानकालः आधुनिककालः समकालः अर्वाचिनकालः इति कथ्यते। परन्तु अस्य शब्दस्य विशेषः अर्थः अस्ति। आधुनिकः वर्तमानकालं निर्दिशति। अस्य कालस्य सीमाना कुतः आरभ्यते, कुत्र च समाप्तं भवति इति विषये पण्डितेषु मतानैक्यम् अस्ति। यद्वा भवतु, अस्मिन् '*संस्कृतसाहित्ये आधुनिकतायाः स्वरूपम्' नामके* शोधप्रबन्धे आधुनिकतायाः स्वरूपमुद्घोषितमस्ति। न केवलं स्वरूपं कालस्यास्य वैशिष्ट्यं माहात्म्यमत्र उपस्थापितं भवतीति।

**सूचकशब्दाः-** आधुनिकत्वम्, कालः, संस्कृतसाहित्यम्, समकालिनः, साम्प्रतम्।

**मूलप्रबन्धः**

- **भूमिका**

विश्वभुवनं परिवर्तलशीलम्। तद्धेतुस्तावत्कालः। सर्वेषामपि सामाजिकपरिवर्तनस्य कारणं हि कालः। तस्मात् साहित्यमपि परिवर्तनशीलम्। यतोहि समाजस्य दर्पणं खलु साहित्यम्। दार्शनिकनये कालः नित्यः एको विभुश्च। परन्तु व्यवहारभेदेन अतीतादिव्यवहारः प्रचलति। तर्कसंग्रहेऽस्ति – 'अतीतादिव्यवहारहेतुः कालः।'[1] इति। तथैव अन्तिमपरिवर्तनो वर्तमानः। तस्य एव आधुनिक इति अभिधा।

- **आधुनिकत्वम्**

'अधुना भव आधुनिक' इति विग्रहानुसारम् अधुनाशब्देन सह ठञ् प्रत्यये आधुनिकशब्दो निष्पद्यते। 'Oxford' इत्यभिधाने आङ्गलभाषायां Modern इति शब्दः आधुनिकस्य कृते प्रयुज्यते। परन्तु शिल्पसंगीतचर्चायां शब्दस्यार्थो भवति 'new and different form traditional style' इति। Modern इति शब्दात् Modernity, Modernism, Modernization चेत्यादिका शब्दा विनिष्पन्नाः। तदनुरूपाः संस्कृतेऽपि अधुनाशब्दाधुनिकः आधुनिकता आधुनिकीकरणम् आधुनिकतावादश्चेति शब्दा जाताः। अधुनाशब्दस्य साम्प्रतम्, इदानीम्, अद्यतनमित्यर्थः प्रचलितः अस्ति। अस्मिन्नेवार्थे अर्वाचीन-मद्यतनमित्यदिशब्दा व्यवह्रीयन्ते। परन्तु अधुना शब्दस्यार्थः कः? को वा तस्य कालः आधुनिककालः? इति जिज्ञासास्ति। भासः कालिदासः सर्वे स्वकाले आधुनिका इदानिन्तु वयं वदामः पुरातनकविः। एकमेव १९४७ वर्षे तत्कालः आधुनिकः आसीत् किन्तु स कालोऽद्य अतीतरूपेन परिचितः। पुनरपि चाद्य कालः आधुनिकः तत्कालः श्वःदिवसे अतीतकालो भविष्यति। तर्हि आधुनिकताशब्देन कस्य कालस्य बोधो भवति इति जिज्ञासा स्वाभाविकी एव। ड.रीताचट्टोपाध्यायमतानुसारं वक्तुं शक्यते यद् या काचन समस्यास्ति सा सर्वदा आधुनिक एव। सा एव आधुनिकता इति संज्ञा लभते। अतः आधुनिको न केवलं कालगतो, विषयगतोऽपि। बङ्गसाहित्ये रवीन्द्रनाथठाकुरेण स्वकृतौ 'साहित्ये पथे' नामके प्रबन्धे आधुनिकतालक्षणप्रसङ्गे अवाचि – 'नदी सामनेर दिके चलते चलते हटात् वाँक फेरे। साहित्यओ तेमनि वरावर सिधे चले ना। यखन से वाँक नेय, तखन सेइ वाँकटाकेइ वलते हय मर्डान। वांलाय वला हय आधुनिक। एइ आधुनिकटा समय निये नय मर्जि निये'[2] इति। अर्थाद् युगपरिवर्तनेन सह साहित्यगतिमार्गस्य परिवर्तनमपि लक्षणीयम्।

**Correspondence:**
**मानु-दासः**
गवेषिका,
राष्ट्रीयसंस्कृतविश्वविद्यालयः,
तिरुपतिः, अन्ध्रप्रदेशः, भारतवर्षम्

वैदिकसाहित्यस्य विषयवैशिष्ट्यादेः परिवर्तनं दृश्यते रामायण-महाभारताद्यार्षाकव्ये ततो भास-कालिदासकाव्ये तथैव परिशीलन-मवलोक्यते वर्तमाने साहित्ये।

यद्वा भवतु आधुनिककालविषयेऽस्मिन् विभिन्ना समालोचकाः स्वमतमुपस्थापयन्ति। यान्त्रिकीकरण-नगरीसभ्यता-विश्वयुद्ध-अणुवा-म्बकृतनरसंहारादिभिः कारणैः मनुष्यनियतिविधायकाः कति प्रश्ना मानवमनसि उत्थापिताः। किमिदं सर्वं ईश्वरः करोति न वा कारयति? किं वा निर्दोषजनसंहारस्य कृते निष्कारुण्यमीश्वरस्य येऽणुवाम्बँ-स्फोटेन मृतास्ते सर्वे पापिमनुष्याः? प्रश्नानामेषां सदुत्तरं नागच्छति सामाजिकमानवमूल्यबोधैः? मानवमस्तिस्कस्य सुमार्गनिर्माणं मनुष्यस्य स्वस्योत्तरदायित्वम्। अस्मात्संघर्षादाधुनिकचेतनायाः प्रार्दुर्भावो जातः। पाश्चात्त्यसाहित्ये यान्त्रिकीकरण-नगरीकरण-विश्वयुद्धकृतनरसंहारजातनैराश्यात्प्रसूता विशिष्टता नवचेतनार्थादा-धुनिकतेति भाष्यम् प्रवर्ततम् आधुनिकतायाः इति गौडबङ्ग-विश्वविद्यालयस्य ड.शुभ्रजितसेनमहोदयस्याभिमतम्।

पाश्चात्यसाहित्यसमालोचकः इरविंगहोवेमहाभागः (Irving Howe) समकालीनम् आधुनिकता चेत्येतयोः शब्दयोःसीमा स्पष्टीकृतवान्। तेनोद्यते- 'Where the contemporary refers to time,the modern refers to sensibility and style and whereas the contemporary is a term of natural reference, the modern is a term of critical treatment and judgment.'[3] इति।

वस्तुतः, आधुनिकताया धारणा स्वभावतः एव गतिशीला। प्रसङ्गेऽस्मिन् रवीन्द्रनाथस्य चिन्ता स्मरणीया – 'सेकालेर यौवनमदमत्त आधुनिकता एकाले लोलचर्म पलितकेश आवार एकालेर झकझके आधुनिकता पँचिश पञ्चाश कि एकश वछर परे वेजाय सेकेले हये यावे' इति। अत्रेदवधेयं यत् तत्कालस्य यौवनमदमत्ताधुनिकता अधुनातने काले लोलचर्मान्विता शुभ्रकेशा च, पुनरिदानीन्तनी चाक्चिक्यमयी आधुनिकता पञ्चविंशतिवर्षेभ्यः परमतीव तात्कालिकी भवेदिति। एवं जनिर्भविताधुनिकतायाः। यस्याः यौवनोज्वलप्रभाया बभूव विमुग्धो भविष्यसहृदयपरम्परा। आधुनिकशब्दस्य चर्चावसरे ब्रिटिशसाहित्यतत्त्ववेत्ता क्रिस्तोफार-कडओयेलमहाभागः कथयामास (Kristopher Caudwell) – 'When we use the word Modern in a general sense, we use it to describe a whole complex of culture..., this complex rests on economic foundation. This complex itself is changeful.'[4] इति।

अन्यत्र 'संस्कृत साहित्य वीसवीं शताव्दी' नामके ग्रन्थे राधावल्लभत्रिपाठिना आधुनिकताया केनच विषया निर्दिष्टा कृताः। तान् अवलम्ब्य आधुनिकता प्राप्ता। ते यथा-

(1) परस्पराधुनिकतायसमन्वयः (2) नूतनशब्दनिर्माणम् (3) राष्ट्रवादिकाव्यधारा (4) पौरस्त्यज्ञानम् (5) स्तुतिकाव्यम् (6) देशभक्तिः (7) गान्धिवादः (8) समाजसंस्कारः (9) व्यक्तिवादसृष्टिः (10) बङ्गविधानम् (11) नवचेतना (12) नूतनविषयः (13) समकालिकता (14) नूतना विधा (15) अनुवादः (16) यथार्थवोधगम्यत

न केवलं संस्कृतसाहित्ये पाश्चात्यसाहित्ये अपि आधुनिकतायाः कानिचन वैशिष्ट्यानि लक्ष्यते। तमाधुनिकसाहित्यं परिभव्य हर्षदेवमहोदयेन आधुनिकसंस्कृतसाहित्यस्य सप्तगुणाः स्मीकृताः। ते खलु –

1.विषयनावीन्यम्

2.आन्तराष्ट्रीया स्वयुगसंवेदना

3.अस्त्वित्वलोपः अस्त्वित्वलोपवेदना वा

4.उपमानजोयनायां परिवर्तनम्

5.परम्पराविच्छेदो नवविधानां स्वीकारो वा

6.भाषाभिव्यक्तिपरिवर्तनम्

7.पाश्चात्यवादानां वैश्विकपरिभाषाणां स्वीकारः च।

कश्चन साहित्यविशेषो विशिष्टसमये यदा परित्यक्तप्रत्नगतिपथः सन्नूत्नपथे प्रवाहितो भवति, विलक्षणशैलीवैशिष्ट्येन चरञ्जितो भवति, तदा स तदाधुनिक◌ाभिधानं लभते। कालिदासः स्वकविकर्म प्रत्नमिति तथा च काव्यसर्जनं नूतनमित्याख्यया ख्यातवान् मालविकाग्नि-मित्रमिति रूपकस्य प्रस्तावनायाम्- 'पुराणमित्येव न साधु न चापि काव्यं नवमित्यवद्यम्।'[5] इति।

- **संस्कृतसाहित्ये आधुनिकतायाः प्रारम्भकालविषयकवादाः**

भिन्ने साहित्ये आधुनिकता भिन्ना तत्तु साधारणः। निर्दिष्टसाहित्येऽपि ईदृशा अवस्था दृश्यते। संस्कृतसाहित्ये आधुनिकताया प्राग्-लग्नविषये मतभेदा परिदृश्यन्ते। निम्ने कति साहित्यसमालोचकमताः उपस्थाप्यन्ते मया –

1.श्रीरामजी-उपाध्यायममहोदयेन जगन्नाथपरवर्तिनिकाले लिखितं - यत् साहित्यं वर्तते तत् सर्वमपि आधुनिकसंस्कृतसाहित्यमिति।

2.विश्वनाथभट्टाचार्येणापि समर्थनं प्रदीयते तात्कालिकसमाजप्रभावेन रचितं सर्वं साहित्यं आधुनिकत्वमेव प्राप्यते।

3.वुल्फवर्जिनियापादः (Virginia Woolf) वदति - 'on or about December 1910 human nature changed इति। १९१० खृष्टाब्दस्योत्तरकाले मानवस्वभावस्य चिन्तनस्य च परिवर्तनम-भवदिति कृत्वा साहित्येऽप्यस्य प्रभावः संलक्ष्यते। तदवलम्ब्य साहित्यमाधुनिकसाहित्यमिति समीचिनं मतम्।

4.पाश्चात्यसमालोचकः फ्रान्ककरमोडमहोदयः (Frank kermode) आधुनिकता १९०७ खृष्टाब्दतः १९२५ पर्यन्तमेकोनविंशति-संवत्स-राणां मध्ये प्रतिष्ठिता जाता' इति कथयति।

5.जगन्नाथादुत्तरवर्ति संस्कृतसाहित्यमाधुनिकसंस्कृतसाहित्यमिति वक्तुकामोऽस्ति रामजी-उपाध्यायः।

6.अजितठाकुरनये १८५०-१९५० इत्यतः यावत् नवजागरणस्य पूर्वकालः। १९५० इत्यतः अद्यावधि तदुत्तरकालः आधुनिकताया इति।

7.अभिराजराजेन्द्रमिश्रस्य सामाधानं यत् ईशवीयस्य चतुरशीत्य-धिकसप्तदशशततमस्य संवत्सरस्योत्तरवर्तिकाले निर्मितसाहित्य-मर्वाचीनमिति। कोविदोऽयमर्वाचीनसंस्कृतसाहित्यं युगत्रयेन विभक्त-मासीत्–

क) पुनर्जागरणकालः (१७८४-१८८४)

ख) स्थापनकालः (१८८४-१९५०)

ग) समृद्धिकालः (१९५०-अद्यावधि)

8.अस्यार्वाचीनसंस्कृतसाहित्यस्य प्रचलितेषु सीमाविषयकवादेषु एकतमं तावत् – १८५० खृष्टाब्दतः १९०० खृष्टाब्दपर्यन्तमर्वाचीन-साहित्यस्य आरम्भकालः, १९०० इत्यतः १९४७ पर्यन्तं यावत् पुनरुत्थानकालोऽस्य अर्वाचीनसाहित्यस्य, १९४७ खृष्टाब्दतो वर्तमानकालं यावदस्य समृद्धिलग्न इति समर्थनयोग्यार्होऽस्ति। परन्तु श्रीधरभास्करवार्णेकारमतानुसारं सप्तदशशताब्दी खलु आधुनिक-संस्कृतसाहित्यस्य प्रारम्भकाल इति सर्वैर्विदित मासीत्। राजनैतिक-परिवर्तनस्य दृक्कोणतः आधुनिकसंस्कृतसाहित्यं स्वातन्त्र्यपूर्वोत्तर-भेदाभ्यां द्वेधा विभक्तमिति श्रीचन्द्रकिशोरगोस्वामिनः मतम्।

9.जगन्नाथपाठकेन व्यक्तिविशेषमाधारीकृत्य संस्कृतसाहित्यस्याधुनि-ककालो युगत्रयेन विभज्यते-

क) अप्पाशास्त्रीराशिवडेकरयुगः (१८७३-१९१३)

ख) भट्टयुगः (भट्टमथुरानाथशास्त्रियुगः) (१९३०-१९६०)

ग) डा.वेंकटराघवन्युगः (१९६०-१९८०)

साहित्यसमालोचकवर्यैः कलानाथशास्त्रिमहाभागैर्जगन्नाथपाठकस्य सिद्धान्तः स्वीकृतः। परं प्रश्नो जायते १९८० खृष्टाब्दात्परवर्तिकालः कस्य कयोर्वा नाम्ना व्यपदेष्टुं शक्यते? समयेऽस्मिन्नभिराजेन राधावल्लभेन च विशेषेणार्वाचीनसंस्कृतसाहित्यम् अभवत् सुसमृद्धमिति। हर्षदेवमाधवेन मन्यते यत् १९८० खृष्टाब्दा-दुत्तरवर्तियुगः अभिराजयुग इति निश्चप्रचं वक्तुं शक्यते।

अत्रेदं विचार्यं यत् किं साहित्ये विशेषेण संस्कृतवाङ्मये कालगतमेवाधुनिकत्वं युक्त्याङ्गीकार्यम्? प्रसङ्गेऽस्मिन् रवीन्द्रनाथ-स्योक्तिः प्रणिधानयोग्या-

'पांजि मिलिये Modern एर सीमा निर्णय करवे के? एइ आधुनिकता समय निये नय, मर्जि निये।'[6] इति। अत्रायमाशयः यत् कः खलु पञ्चाङ्गमनुसृत्याधुनिकतायाः सीमानिर्णयं करिष्यति?'– एतदा-धुनिकत्वं न कालगतं किन्तु मनोभावगतमिति। किन्तु न हि केवलं मनोभावपरपर्यायमाधुनिकत्वं, समयनिष्ठमपीति स्पष्टम्। एतद्वय-माधुनिकसाहित्यस्य तथा संस्कृतसाहित्यस्यापि नियामकशक्तिरूपम्।

- **उपसंहृतिः**

आधुनिककालस्य सीमा सर्वदा भिन्ना दृश्यते। यद्वा भवतु सत्यमिदं यत्वर्तमानकालसम्बन्धिसमयः आधुनिककालः विषये अस्मिन् न कापि सन्देहः। वर्तमानकाले घटितसमस्यादिविषयमाधृत्य रचितं काव्यम् आधुनिककाव्यमिति वक्तुं शक्यते अस्माभिः। उनविंशशताव्दीतः विविधाः कवयः आधुनिकविषयमाश्रित्य काव्यं रचयन्ति। प्राचीन-काव्यात् आधुनिककाव्यमिदं नूतनम् अपूर्व दृश्यते, मनसि च आनन्दः जायतेति शवम्।

**ग्रन्थसन्दर्भसूची**


- Chattopadhyay, Rita – *'Modern Sanskrit Literature : Some Observations*', DSA, Department of Sanskrit, Jadavpur University, Kolkata, 2004
- Chattopadhyay, Rita – *'20th Century Sanskrut Literature (A Glimpse into Tradition and Innovation)',* Sanskrit Pustak Bhandar, Kolkata, 2009
- Monier Williams- *A Dictionary English and Sanskrit*, Motilal Banarsidass Publishers Private Limited, Delhi, Fourth Indian Edition, 1976.
- Tripathi, Radhavallabh – *'A Bibliography of Modern Sanskrit Writtings'*, Rashtriya Sanskritv Sansthan, New Delhi, 2012
- *अमरकोषः अमरसिंहस्य* – सम्पा. गुरुनाथ विद्यानिधिभट्टाचार्य्य, संस्कृत पुस्तक भाण्डार, कलकाता, १४१७ वङ्गाब्द।
- आप्ते, विमान शिवराम, *'The Students English Sanskrit Dictionary'* - दिल्ली, तृतीयसंस्करण, सप्तदशदशमुद्रण ,२०१४
- चट्टोपाध्याय, ऋता, *'आधुनिक संस्कृत साहित्य'* छोटगल्प ओ नाटक – प्रोग्रेसिभ पावलिसार्स, कलिकाता, २०१२
- त्रिपाठी, राधावल्लभ – *'संस्कृत साहित्य बिशवीं शताब्दी',* राष्ट्रीय संस्कृत संस्थान, नइ दिल्ली, १९९९
- दाश, नारायणदा, *'संस्कृतसाहित्ये पश्चिमवङ्गस्यावदानम्'* – कथाभारती, कलिकाता, २०१३
- *वक्रोक्तिजीवितम्* कुन्तकस्य – सम्पा. राधेश्याम मिश्र, चौखाम्वा संस्कृत सिरिज, वाराणसी, १९८३
- वन्दोपाध्याय, सुरेशचन्द्र - संस्कृत साहित्ये बाङ्गीलीर दान, संस्कृत पुस्कत भाण्डार, कलकाता, बङ्गाब्द १३६९
- वन्द्योपाध्याय, श्री हरिचरण– *बङ्गीय शब्दकोष* (प्रथम खण्ड, अ-न), साहित्य अकादेमि, नतुन दिल्ली, षष्ठ मुद्रण, २००४
- *साहित्येर पथे, रवीन्द्रनाथ ठाकुर*, विश्वभारती, कलकाता, पुनमुद्रण, १४२४
- सेनः, शुभ्रजित्- *भारतवर्षे आधुनिकसंस्कृतसाहित्यम् : विहङ्गम-दृष्ट्या परिशीलनम्* (Modern Sanskrit Literature in India : A Bird's eye view),संस्कृतपुस्तकभाण्डारः,कोलकाता, प्रथमसंस्करणम्, २०१९

**Website link:-**

- *Modern History* – Wikipedia, https://en.m.wikipwdia.org (Date: 20.07.2025)
- *Modern definition and meaning, Collins English Dictionary,* https://www.collinsdictionary.com (Date: 20.07.2025)
- *Modernism, Definition, History & Examples, Britannica,* https://www.britannica.com (Date: 20.07.2025)


- **पादटिप्पणी –**

1 त.स., नारायण चन्द्र गोष्वामी, पृ. 170

2 साहित्येर पथे, पृ. 21

3 सं.स.प.अ., पृ. 33

4 Wikipedia

5 संस्कृत साहित्य सम्भार, मालविकाग्निमित्रम्, प्रथमाङ्कः, प्रस्तावना, सूत्रधारस्योक्तिः

6 साहित्येर पथे, रवीन्द्रनाथ ठाकुर, विश्वभारती, पृ. 1